National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2019; 1(23): 21-22
© 2019 NJHSR
www.sanskritarticle.com

**डा. शालिकराम त्रिपाठी**
सदस्यः,उत्तरप्रदेश माध्यमिक-
संस्कृत शिक्षा परिषद,
लखनऊ (उ.प्र.)

**Correspondence:**
**डा. शालिकराम त्रिपाठी**
सदस्यः,उत्तरप्रदेश माध्यमिक-
संस्कृत शिक्षा परिषद,
लखनऊ (उ.प्र.)

# सनातनधर्मोद्धारकः आचार्यशङ्करः

**डा. शालिकराम त्रिपाठी**

भारतभूमिः भगवतः अवतारभूमिरस्ति। ऋषीणां महर्षिणां तपोभूमिरियं वेदोपनिषद् गीतादिग्रन्थानां कारणेन ज्ञानभूमिरप्यस्ति। काले-काले अत्र कश्चित् तपश्वी महानात्मा वावतरति देशस्य धर्मस्य समाजस्य च युगानुकूलं मार्गं निर्दिशति। आद्यजगद्गुरुशङ्कराचार्यः अपि तातृशविभूतिषु एकः आसीत्। आचार्यशङ्करेण सनातनधर्मोद्धारकार्यम् अक्षुण्णं कुर्तुं भारतवर्षे चतुर्षु धामसु चतुर्णां पीठानां स्थापना कृता। दक्षिणे पुरातने मैसूरुप्रदेशे शृंगरीमठोऽस्ति यं जनाः मन्यन्ते यदिदं पीठमाचार्येण स्थापपितं प्रथमं पीठमस्ति। अन्यधामसु स्थापितमठानां नामानि सन्ति-जगन्नाथपुर्यां गोवर्धनमठः द्वारिकायां शारदामठः उत्तराखण्डे च ज्योतिर्मठः। मठानां स्थापनां कृत्वा आचार्यशङ्करेण स्वपट्टशिष्याः अध्यक्षत्वेनोद्घोषिताः। ज्योतिर्मठस्याचार्यपरम्परा तु मध्ये विच्छिन्ना जातासीत् किन्तु त्रयाणां मठानामध्यक्षपरम्पराद्यापि विद्यमानास्ति।

आचार्यशङ्करः संन्यासी आसीत् किन्तु तस्य दृष्ट्यनुगुणं संन्यासस्यार्थः एवं नासीत् यत् संसारं त्यक्त्वा वने तपस्याकरणम् अपितु तदनुगुणं तु संन्यासिनः जीवनस्य प्रतिपलं समाजोत्कर्षाय भक्तिव्यमित्यासीत्। आचार्यशङ्करः एतादृशमहापुरुषेष्वेकः आसीत् यैः देशस्य समाजस्य धर्मस्य च रक्षणाय स्वकीयमद्भुतमपूर्वं च योगदानं कृतम्। तेन महापुरुषेण सनातनधर्मस्य रक्षायै सम्पूर्णं जीवनमेव समर्पितम्। किन्त्वधुनाचार्यशङ्करस्य निर्विवादजन्मतिथिः नास्त्यस्मत्पुरतः। आचार्यशङ्करस्यावतरणकालविषये विद्वत्सु मतमतान्तरमवलोक्यते देशीयाः विदेशीयाश्च विद्वांसः ई.पू. प्रथमशताब्दीतः अष्टाशीत्यधिकशप्तशतं 788 ई. पर्यन्तं स्व स्वमतानुगुणं तिथिनिश्चयं कृतवन्तः किन्तु भारतीयमठपरम्परानुसारम् आचार्यस्याविर्भावः 509 नवाधिकपंशतम् ई.पू. इत्यवधावभूदिति। आचार्येण स्थापितपीठेषु अद्यापि एतादृशाभिलेखाः सुरक्षिताः सन्ति येषु मठनिर्माणतः अद्यपर्यन्तम् आचार्याणां सूच्यः विद्यन्ते। शृंगेरीमठानुसारं जगद्गुरोः जन्म 788[1] ई.मध्येऽभवत्। केवलमत्रैव मतान्तरमस्ति अन्य पीमतानुगुणं तु 509 ई.पू.एव।

शङ्करस्य पिता शिवगुरुः माता चार्याम्बा आस्ताम्। सः शङ्कर, अष्टवर्षीयः सन् वेदवेदाङ्गादिषु परं दाक्ष्यमाप्नोत्। तस्मिन्नेव शैशवे स पित्राभावे मातुरनुज्ञया संन्यासिचर्यायै परिब्रजितुमिष्टवान् तदा स्नेहनिर्भरा माता तं त्यक्तुम् अनुमतिं न दत्तवती कस्मिंश्चिद्दिवसे पूर्णानद्यां मकरेण गृहीतः शङ्करः मातरं न्यवेदयत्- मातः! मकरगृहीतस्य मम मरणकाल एव समुपस्थितः तर्हि अनुजानीहि मे संन्यासिदीक्षाव्रताय। यदि भवत्यानुमतिः दीयते तर्हि भगवदनुग्रहेण मम मुक्तिः भवेत्। सा माता नान्यमुपायं तस्य रक्षार्थं दृष्ट्वा प्रव्रज्यमनिच्छन्ती अपि अनुमतिं दत्तवती। तदा प्रभृति शङ्करस्य प्रवृज्याक्रम समारभ्यत अल्पे च वयसि बहु किमपि साधितम् उक्तञ्च-

**अष्टवर्षे चतुर्वेदान् द्वादशे सर्वशास्त्रकृत।**
**षोडषे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात्।।**

आचार्यशङ्करः भगवत्पादगुरोर्दीक्षां गृहीत्वा द्वैतपारावरे शीघ्रमेव निष्णातः सञ्जातः। गुरोराज्ञया स भारतस्य देशप्रदेशेषु अद्वैतध्वजं स्फारयितुं धर्मविजयं समारब्धवान् तदानीं सम्पूर्णदेशे विघटनस्य वातावरणमासीत् उत्तरभारतात् दक्षिणभारतपर्यन्तं लघु-लघुराज्यानां स्थापना सञ्जाता आसीत्। तेषु एकरुपतायाः अभावः आसीत्। सर्वेषु परस्परं विद्वेषः आसीत्। केचन हिन्दवः सनातनधर्मपालकाः आसन् केचन च बौद्धमतपालकाः। केषुचित स्थलेषु जैनाचार्याणामपि मान्यतासीत्। सर्वे स्वतन्त्रास्तित्वनिमित्तं परस्परं संघर्षरताः आसन् कोऽपि कस्यचिदपि न शृणोति स्म। बौद्धमतं तु तदानीं सर्वाधिकं प्रचलितमासीत्। अनेके निर्धनाः धनिकाः राजानश्च बौद्धमतं स्वीकृतवन्तः आसन्। बिम्बसारकनिष्काशोकप्रभृतिराज्ञां काले बौद्धधर्माय राज्याश्रयः आसीत्। सत्तासम्पर्ककारणात् बौद्धसाधवः राजमदोन्मत्ताः आसन्। तेषां व्यवहारे राजनीतिः समागता। तदानीं भागवत-कापालिक-जैन-चार्वककाणादशाक्त पाशुपततान्त्रिकादिमतानां विकृतिकारणात् भारतदेशः अतिपीडितः आसीत। तदानीं तन्त्रयुगे पञ्चमकारयुक्तपदार्थानाम् उपयोगविषये यथार्थतत्वमजानन्तः तान्त्रिकाः कथयन्ति स्म –

**मद्यं मांसं च मीनं च मुद्रा मैथुनमेव च।**
**मकारपंचकं प्राहुर्योगिनां मुक्तिदायकम्।।**

तान्त्रिकानां धारणासीत् यत् तन्त्रसाधनायां मद्यमांसप्रयोगः कर्तुं शक्यः तत्कारणात् जीवहिंसारब्धासीत्। एतस्य मतस्यापि आचार्यशङ्करेण विरोधः कृतः शास्त्रप्रमाणैः च खण्डनं कृतम्। वस्तुतः पञ्चमकाराणां सम्बन्धः अन्तर्यागेन सह विद्यते वाह्यपूजया न। पंचमकाराः शरीरे विद्यमानतत्वानां साक्षात् प्रतीकाः वर्तन्ते। एवमाचार्यशङ्करेण सनातनधर्मसंरक्षणतत्पराणां जनानां सङ्घटनं कृत्वा सनातनधर्मस्य च सर्वोत्कृष्टतां प्रतिपाद्य रोग इव सर्वसमस्यानां निदानं कृतम्। उचितौषधिमाध्यमेन देशस्य धर्मस्य समाजस्य च उपचारमकरोत्। धर्मक्षेत्रे तेन महापुरुषेण नवयुगस्यारम्भः कृतः। तस्य योग्यतायाः बुद्धिकुशलतायाः च कारणात् बौद्धाः तान्त्रिकाः शाक्ताः च नतमस्तकाः सञ्जाताः। फलतः वैदिकसनातनधर्मस्य प्रतिष्ठा वेदेषु श्रद्धा, ज्ञाने सभादरस्य भावश्च सर्वत्र प्रसृताः। आचार्येण समस्तभारतीयजनान् आध्यात्मिकतायाः सूत्रे बद्ध्वा तेषु दृढैकतायाः भावना सुदृढीकृता। बौद्धानां संघव्यवस्था बौद्धानां च प्रचारकार्याणि दृष्ट्वा प्रभावितः सन्नाचार्यशङ्करः आम्नायमठानां स्थापनामकरोत्। तथा च साधवः नित्यं धर्मपचारकार्यं कुर्युः तदर्थमाचार्येण व्यवस्थोपकल्पिता।

एतत्सर्वं साधितुमाचार्येण महत्कष्टं सोढं काठिन्यं चानुभूतम्। अन्तिमेषु दिवसेषु एताः समस्याः असाधारणाः भूत्वा समागताः तदानीमाचार्यशङ्करः कर्णाटके आसीत्। सुधन्वा तत्रत्यः राजा आसीत्। सुधन्वा विद्वान् विचारवान् चासीत्। सः वैदिकधर्मशिक्षायाः उपयोगितां जानाति स्म। अतः सः सङ्कराचार्याय संरक्षणमयच्छत् सर्वविधसहयोगं चाकरोत्। कर्णाटके तदानीं कापालिकानां बाहुल्यमासीत्। तेषां स्वामी कुचक्रनामकः आसीत्। सः भैरवस्य उपासकः एव न अपितु तान्त्रिकोपासनानां सर्वत्र जालं प्रसारितवानासीत्। तस्य शताधिकाः शिष्याः आसन्। ते मदिरां पीत्वा यदा वेशं धारयन्ति स्म तदा सर्वेऽपि भैरववदेव दृश्यन्ते स्म। जनाः तेभ्यः भीताः त्रस्ताः च आसन्। एतादृशसमये आचार्यशङ्करस्य तत्रोपस्थितिं प्राप्य जनाः तथैव सन्तोषमनुभूतवन्तः यथा ग्रीष्मर्तोरनन्तरं वर्षर्तौ जनाः प्रमुदिताः भवन्ति। आचार्यस्य प्रयासेन जनाः अनिष्टकारितान्त्रिकसाधनापद्धतिं त्यक्तवन्तः शताधिकाः कापालिकाः शंकराचार्यस्य शिष्याः अभवन्। एतत्सर्वं दृष्ट्वा कापालिकानां स्वामी चिन्तितोऽभवत् शङ्कराचार्यसमीपं गत्वापशब्दमुक्तवान् तान्त्रिकाभिचारैः मारितुमपि उक्तवान् किन्तु आचार्यशङ्करः तस्मान्न भीतः स्वमतस्य च निष्ठापूर्वकं प्रचारमकरोत्। यदा कुचक्रः अनेकान् दुष्टशिष्यान् मदिरां पायमित्वाचार्यं मारितुं प्रेषितवान् तदा सुधन्वानामकस्य राज्ञः सेनयाचार्यो रक्षितः। अन्ततः अनेके कापालिकाः मृताः तेषां च स्वामी स्वयमेव पराजयं प्राप्यं पलायितः। अस्यां दिग्विजययात्रायां विविधैर्देवरूपैराचार्यैः सह शास्त्रार्थमपि कृतमाचार्येण। मण्डनमिश्रेण सह शास्त्रार्थे माडनमिश्रस्य पत्नी भारती निर्णायिका बभूव।[2] भारतस्य सांस्कृतिकैक्यस्य विधानाय देशाय चतुर्षु सीमान्तप्रदेशेषु अद्वैतविद्याप्रकाशस्तम्भानिव महामठान् स्थाययामास्। तस्मादेव कालात् अद्यापि विश्वविद्यालयरूपाः संस्थाः बदरी-द्वारका-सेतुबन्धरामेश्वर पुरीश्रीनगरादिषु प्रदेशेषु राजन्ते। अद्वैतदर्शनं देशीयानां वैदेशिकानां च मानसे स्थापयन्ति।

**सन्दर्भ सूची : –**

1.Indian Antiquary, 1982, pp. 173-75.
2.शंकर दिग्विजय, 3-57